ॐ ऐरावत्यै नमः । झषायै । चषिकायै । पथिकायै । तन्त्र्यै ।
वीणायै । वेणवे । प्रियंवदायै । कुण्डलिन्यै । निर्विकल्पायै । गायत्र्यै ।
नरकान्तकायै । कृष्णायै । सरस्वत्यै । ताप्यै । पयोर्णायै ।
शतरुद्रिकायै । कावेर्यै । शतपत्राभायै । शतबाहवे नमः । ६८०

ॐ शतह्रदायै नमः । रेवत्यै । रोहिण्यै । क्षिप्यायै (क्षिप्रायै) ।
क्षीणायै । क्षोण्यै । क्षमायै । क्षयायै । क्षान्त्यै । भ्रान्त्यै ।
गुरवे । गुर्व्यै । गरिष्ठायै । गोकुलायै । नद्यै । नादिन्यै ।
कृषिण्यै । कृष्यायै । सत्कुट्यै । भूमिकायै नमः । ७००

ॐ भ्रमायै नमः । विभ्राजमानायै । तीर्थ्यायै । तीर्थायै ।
तीर्थफलप्रदायै । तरुण्यै । तामस्यै । पाशायै । विपाशायै ।
पाशधारिण्यै । पशूपहारसन्तुष्टायै । कुक्कुट्यै । हंसवाहनायै ।
मधुरायै । विपुलायै । आकाङ्क्षायै । वेदकाण्ड्यै । विचित्रिण्यै ।
स्वप्नावत्यै । सरिते नमः । ७२०

ॐ सीताधारिण्यै नमः । मत्सर्यै । मुदे । शतद्रुवे । भारत्यै ।
कद्रूवे । अनन्तायै । अनन्तशाखिन्यै । वेदनायै । वासव्यै । वेश्यायै ।
पूतनायै । पुष्पहासिन्यै । त्रिशक्तये । शक्तिरूपायै । अक्षरमात्रे ।
क्षुर्यै । क्षुधायै । मन्दायै । मन्दाकिन्यै नमः । ७४०

ॐ मुद्रायै नमः । भूतायै । भूतपतिप्रियायै । भूतेष्टायै ।
पञ्चभूतघ्न्यै । स्वक्षायै । कोमलहासिन्यै । वासिन्यै । कुहिकायै ।
लम्भायै । लम्बकेश्यै । सुकेशिन्यै । ऊर्ध्वकेश्यै । विशालाक्ष्यै ।
घोरायै । पुण्यपतिप्रियायै । पांसुलायै । पात्रहस्तायै । खर्पर्यै ।
खर्परायुधायै नमः । ७६०

ॐ केकर्यै नमः । काकिन्यै । कुम्भ्यै । सुफलायै । केकराकृत्यै ।
विफलायै । विजयायै । श्रीदायै । श्रीदसेव्यायै । शुभङ्कर्यै ।
शैत्यायै । शीतालयायै । शीधुपात्रहस्तायै । कृपावत्यै । कारुण्यायै ।
विश्वसारायै । करुणायै । कृपणायै । कृपायै । प्रज्ञायै नमः । ७८०

ॐ ज्ञानायै नमः । षड्वर्गायै । षडास्यायै । षण्मुखप्रियायै ।
क्रौञ्च्यै । क्रौञ्चाद्रिनिलयायै । दान्तायै । दारिद्र्यनाशिन्यै ।
शालायै । आभासुरायै । साध्यायै । साधनीयायै । सामगायै ।
सप्तस्वरायै । सप्तधरायै । सप्तसप्तिविलोचनायै । स्थित्यै ।

